Narmadashtakam

Sanskrit · Devanagari source script · Latin rendering available

श्रीमदाद्य-शंकराचार्य-विरचित-नर्मदाष्टकम् ।

सबिन्दुसिन्धुसुस्खलत्तरङ्गभङ्गरञ्जितं
द्विषत्सुपापजातजातकारिवारिसंयुतम्।
कृतान्तदूतकालभूतभीतिहारिवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥१॥

śrīmadādya-śaṃkarācārya-viracita-narmadāṣṭakam |

sabindusindhususkhalattaraṅgabhaṅgarañjitaṃ
dviṣatsupāpajātajātakārivārisaṃyutam|
kṛtāntadūtakālabhūtabhītihārivarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||1||

त्वदम्बुलीनदीनमीनदिव्यसम्प्रदायकं
कलौमलौघभारहारिसर्वतीर्थनायकम्।
सुमच्छकच्छनक्रचक्रचक्रवाकशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥२॥

tvadambulīnadīnamīnadivyasampradāyakaṃ
kalaumalaughabhārahārisarvatīrthanāyakam|
sumacchakacchanakracakracakravākaśarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||2||

महागभीरनीरपूरपापधूतभूतलं
नमत्समस्तपातकारिदारितापदाचलम्।
जगल्लये महाभये मृकण्डुसूनुहर्म्यदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥३॥

mahāgabhīranīrapūrapāpadhūtabhūtalaṃ
namatsamastapātakāridāritāpadācalam|
jagallaye mahābhaye mṛkaṇḍusūnuharmyade
tvadīyapādapaṅkajaṃ namāmi devi narmade||3||

गतं तदैव मे भयं त्वदम्बु वीक्षितं यदा
मृकण्डुसूनुशौनकासुरारिसेविसर्वदा।
पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥४॥

gataṃ tadaiva me bhayaṃ tvadambu vīkṣitaṃ yadā
mṛkaṇḍusūnuśaunakāsurārisevisarvadā|
punarbhavābdhijanmajaṃ bhavābdhiduḥkhavarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||4||

अलक्षलक्षकिन्नरामरासुरादिपूजितं
सुलक्षनीरतीरधीरपक्षिलक्षकूजितम्।
वसिष्ठशिष्टपिप्पलादकर्दमादिशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥५॥

alakṣalakṣakinnarāmarāsurādipūjitaṃ
sulakṣanīratīradhīrapakṣilakṣakūjitam|
vasiṣṭhaśiṣṭapippalādakardamādiśarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||5||

सनत्कुमारनाचिकेतकश्यपात्रिषट्पदैः
धृतं स्वकीयमानसेषु नारदादिषट्पदैः।
रवीन्दुरन्तिदेवदेवराजकर्मशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥६॥

sanatkumāranāciketakaśyapātriṣaṭpadaiḥ
dhṛtaṃ svakīyamānaseṣu nāradādiṣaṭpadaiḥ|
ravīndurantidevadevarājakarmaśarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||6||

अलक्षलक्षलक्षपापलक्षसारसायुधं
ततस्तु जीवजन्तुतन्तु भुक्तिमुक्तिदायकम्।
विरिञ्चिविष्णुशंकरस्वकीयधामवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥७॥

alakṣalakṣalakṣapāpalakṣasārasāyudhaṃ
tatastu jīvajantutantu bhuktimuktidāyakam|
viriñciviṣṇuśaṃkarasvakīyadhāmavarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||7||

अहोऽमृतं स्वनं श्रुतं महेशकेशजातटे
किरातसूतवाडबेषु पण्डिते शठे नटे।
दुरन्तपापतापहारिसर्वजन्तुशर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे॥८॥

aho'mṛtaṃ svanaṃ śrutaṃ maheśakeśajātaṭe
kirātasūtavāḍabeṣu paṇḍite śaṭhe naṭe|
durantapāpatāpahārisarvajantuśarmade
tvadīyapādapaṅkajaṃ namāmi devi narmade||8||

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा
पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा।
सुलभ्यदेहदुर्लभं महेशधामगौरवं
पुनर्भवा नरा न वै विलोकयन्ति रौरवम्॥९॥

idaṃ tu narmadāṣṭakaṃ trikālameva ye sadā
paṭhanti te nirantaraṃ na yānti durgatiṃ kadā|
sulabhyadehadurlabhaṃ maheśadhāmagauravaṃ
punarbhavā narā na vai vilokayanti rauravam||9||

इति श्रीमद् आद्यशंकराचार्यविरचितं नर्मदाष्टकं सम्पूर्णम् ।नर्मदे हर । नर्मदे हर
। नर्मदे हर ॥

iti śrīmad ādyaśaṃkarācāryaviracitaṃ narmadāṣṭakaṃ sampūrṇam
|narmade hara | narmade hara | narmade hara ||

Source & edition

Complete selected Sanskrit Wikisource poem block; source opening/closing lines and spellings are preserved. Segment grouping is added for reading. No English meaning is supplied for this edition.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. नर्मदाष्टकम्, revision 223814. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-223814-aa79c47161.